International Journal of Sanskrit Research 2022; 8(2): 187-188

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(2): 187-188
© 2022 IJSR
www.anantaajournal.com
Received: 03-01-2022
Accepted: 07-02-2022

**डा. राजेश एम्. डि**
अतिथि उपन्यासकः, मङ्गलुरु
विश्वविद्यालय कालेज्, मङ्गलुरु,
कर्नाटक, भारत

**Corresponding Author:**
**डा. राजेश एम्. डि**
अतिथि उपन्यासकः, मङ्गलुरु
विश्वविद्यालय कालेज्, मङ्गलुरु,
कर्नाटक, भारत

# पण्डितराजजगन्नाथमम्मटाचार्योः मते अर्थशक्तिमूलध्वनेर्भेदाः विमर्शः ।

**डा. राजेश एम्. डि**

**प्रस्तावना**
अर्थशक्तिमूलध्वनेर्भेदविषये जगन्नाथः मम्मटाचार्येण नितान्तमेव विरुद्ध्यते ।

**१.मम्मटाचार्यमते अर्थशक्तिमूलध्वनेर्भेदाः**
काव्यप्रकाशे तदेवं निरूपितम् –

> अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः सम्भवी स्वतः।
> प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भितस्य वा ॥
> वस्तु वालङ्कृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ।
> वस्त्वलङ्कारमथवा तेनायं द्वादशात्मकः ॥

इदम्प्रथमकल्पितः स्वतःसम्भवी चेति द्विविधोऽर्थः। तत्र स्वतः सम्भवी न केवलं भणितिमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन सम्भाव्यमानः। कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वक्त्रेति वा द्विविधोऽपर इति त्रिविधः । वस्तु वालङ्कारो वासाविति षोढा व्यञ्जकः। तस्य वस्तु वालङ्कारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः ।

**२. जगन्नाथमते अर्थशक्तिमूलध्वनेर्भेदाः**
शब्दशक्तिमूलस्य वस्त्वलङ्कारात्मना द्वैविध्यं सर्वेऽप्यालङ्कारिका अङ्गीकुर्वन्ति । किन्तु अर्थशक्तिमूलध्वनेः प्रकारेष्वालङ्कारिकाणां मतभेदो दृश्यते ।
तस्य तु प्रधानतया लोकसिद्धत्व-कविप्रौढोक्तिनिष्पन्नत्वाभ्यां द्वैविध्यम् । तत्र कविप्रौढोक्तिसिद्धभेद एते चत्वार एव प्रकारा अङ्गीक्रियन्ते जगन्नाथेन-
१. कविप्रौढोक्तिसिद्धवस्तुना वस्तुध्वनिः।
२. कविप्रौढोक्तिसिद्धवस्तुना अलङ्कारध्वनिः।
३. कविप्रौढोक्तिसिद्धालङ्कारेण वस्तुध्वनिः।
४. कविप्रौढोक्तिसिद्धालङ्कारेण अलङ्कारध्वनिः।

कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्य भेदान् सयुक्ति खण्डयति जगन्नाथ एवम्-
प्रतिभानिर्वर्तितत्वाविशेषाच्च कवितदुम्भितवक्तृप्रौढोक्ति-निष्पन्नयोरर्थयोर्न पृथग्भावेन गणनोचिता, उम्भितोम्भितादेरपि भेदान्तरप्रयोजकतापत्तेःइति । यदि कविनिबद्धवक्तृप्रौढोक्ति- सिद्धभेदोऽङ्गीक्रियते तर्हि कविनिबद्धनिबद्धवक्तृप्रौढोक्तिसिद्ध-भेदस्याप्यङ्गीकरणीयत्वमापतति । किन्तु तन्नाङ्गीकृतं खलु? इति।

**मतान्तरपर्यालोचनम्, निष्कर्षश्च**
ध्वन्यालोकस्य द्वितीयोद्योते ध्वनिप्रस्थानप्रवर्तक आनन्दवर्धनो वक्ति –

प्रौढोक्तिमात्रनिष्पन्नशरीरः सम्भवी स्वतः ।
अर्थोऽपि द्विविधः ज्ञेयो वस्तुनोऽन्यस्य दीपकः॥[1]

अर्थशक्त्युद्भवानुरणनरूपव्यङ्ग्ये ध्वनौ यो व्यञ्जकोऽर्थ उक्तस्तस्यापि द्वौ प्रकारौ, कवेः कविनिबद्धस्य वा वक्तुः प्रौढोक्तिमात्रनिष्पन्नशरीर एकः, स्वतःसम्भवी द्वितीयः। इति ।[2]
एवमानन्दवर्धनस्याभिप्रायेऽप्यर्थशक्तिमूलध्वनिरष्टविध एव ।
परं प्राचीना अभिनवगुप्तपादादयः कविनिबद्धवक्तृ-प्रौढोक्तावपि काव्यसौन्दर्यं पश्यन्तस्तस्यापि चतुरान् भेदानेवं प्रतिपादयन्ति –
१. कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुना वस्तु ।
२. कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुना अलङ्कारः ।
३. कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारेण वस्तु ।
४. कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारेणालङ्कारः ।

ध्वन्यालोकस्य व्याख्याने लोचनटीकायाम् अभिनवगुप्तपादैरेवमभिहितम् –
"प्रौढोक्तीत्यादिना योऽर्थान्तरस्य दीपको व्यञ्जकोऽर्थ उक्तः सोऽपि द्विविधः । न केवलमनुस्वानोपमो द्विविधः यावत्तद्भेदो यो द्वितीयः सोऽपि व्यञ्जकार्थद्वैविध्यद्वारेण द्विविध इत्यपिशब्दार्थः । प्रौढोक्तेरप्यवान्तरभेदमाह कवेरिति, तेनैते त्रयो भेदा भवन्ति इति। एतद्व्याख्यानानुसारमानन्दवर्धनस्याप्ययमेवाभिप्राय इति वक्तव्यं भवति ।[3]

चन्द्रालोककारस्यायमभिप्रायः –

वस्त्वलङ्कारयोर्व्यक्तेर्भेदौ द्वौ शब्दशक्तिजौ ।
अर्थशक्तिसमुत्थस्य भेदा द्वादश तद्यथा ॥
चत्वारो वस्त्वलङ्कारमलङ्कारस्तु वस्तु तत् ।
अलङ्कारमलङ्कारो वस्तु वस्तु व्यनक्ति तत् ॥
वक्तुः कविनिबद्धस्य कवेर्वा प्रौढिनिर्मितः।
स्वसिद्धो वा व्यञ्जकोऽर्थश्चत्वारस्त्रिगुणात्मकः॥[4]

यद्यपि जगन्नाथस्य मतमिदं युक्तियुक्तमेव तथापि कविप्रौढोक्तिनिष्पन्न इव कविनिबद्धवक्तृप्रौढोक्तावपि चमत्कारं पश्यद्भिः प्राचीनैः सोऽपि भेदोऽङ्गीकृतः । यतो हि प्रथमोम्भितस्य अर्थात् कविनिबद्धवक्तृप्रौढोक्तौ चमत्कारातिशयः दृश्यते । परन्तु कविनिबद्धनिबद्धवक्तृप्रौढोक्तौ चमत्कारस्य न्यूनता एवेति हेतोः, कविनिबद्धनिबद्धवक्तृप्रौढोक्तिसिद्धभेदमनङ्गीकृत्य कविनिबद्धवक्तृप्रौढोक्तिसिद्धभेदमङ्गीचक्रुः । तेषां मतं नागेशेनापि समर्थितमस्ति एवम्-
'वृद्धोक्तिविषयात् शिशूक्तिविषय इव कव्युक्तिविषयात् कविनिबद्धोक्तिविषये चमत्काराधिक्यस्यानुभविकत्वात् पृथगुक्तिः। ततः परञ्च प्रणिधानसाध्यप्रतीतिकतया चमत्कारस्थगनात् नोम्भितोम्भितादेः पृथगणनेति नव्याः' इति ।[5]
काव्यप्रकाशस्य उद्योतटीकायामप्येतदेवं समर्थितम्-
'वृद्धोक्तिविषयाच्छिशूक्तिविषय इव कव्युक्तिविषयात्तन्निबद्धोक्तिविषयोऽधिकतररागप्रकटकत्वेनाधिकचमत्कारीति द्वयोर्भेदः' इति ।[6]
उदाहरणार्थम्-
(काव्यप्रकाशे कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुना वस्तुध्वनेरुदाहरणत्वेन दत्तस्य प्राकृतपद्यस्य संस्कृतच्छाया)-
'ये लङ्कागिरिमेखलासु स्खलिताः सम्भोगखिन्नोरगी-

स्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वम्।
त इदानीं मलयानिला विरहिणीनिःश्वाससम्पर्किणो
जाता झटिति शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव ॥'

ये मलयानिलाः लङ्कागिरेर्मेखलासु पतिताः सन्तः सम्भोगश्रान्तसर्पिणीनां विस्तृतानामुद्गतानां च फणानामावल्या पाने कृते सति क्षीणतां प्राप्ता आसन् ते मलयानिला इदानीं प्रवृद्धैः विरहिणीनिःश्वासैः सम्पर्किणः सन्तः शिशुत्वे सत्यपि झटित्येव तारुण्यपूर्णा इव परिपुष्टा जाता इति श्लोकार्थः ।
वसन्तवर्णनपरं पद्यमिदम् । अत्र कविः कश्चन, तन्निबद्धवक्त्री महिषीसखी, तस्याः प्रौढोक्त्या सिद्धं वाच्यार्थरूपं वस्तु । तेन वस्तुना विरहिणीनिःश्वासप्राप्तैश्वर्या दक्षिणानिलाः किं किं न कुर्वन्ति? (सर्वं कुर्वन्ति) इति वस्तु व्यज्यते ।
सामान्यतः शृङ्गारपरश्लोकाः नायिकायाः विषये कविना साक्षाद्यद्युच्यन्ते तर्ह्यवश्यं तस्य तादृशी रमणीयता न भवति, यादृशी आत्मीयया सख्या प्रियेण वा कथिते भवति । अत एव कवयः तन्मुखेनैव वादयन्ति। अत्रापि तादृश एव सन्दर्भे कविना सख्युर्मुखाद् वाचितम् ।
एवं सन्दर्भविशेषेषु कविनिबद्धवक्तृप्रौढोक्तेरनिवार्यता अस्त्येव। अतस्तस्यापि सौन्दर्यहेतुत्वं दृष्ट्वा प्राचीनालङ्कारिकैरर्थशक्तिमूलध्वनेरयमपि प्रकारोऽङ्गीकृतः। तथापि कविनिबद्धनिबद्धवक्तृप्रौढोक्तिसिद्धस्येव कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्यापि कविप्रतिभानिर्वर्तितत्त्वमेवेति कारणात्तस्य पृथग्गणना नोचिता इति जगन्नाथः। महिषीसखी यद्वदति तद्वचनंमूलतः कवेरेव। अतः सर्वात्मनाप्यर्थशक्तिमूलसंलक्ष्यक्रमध्वनेरष्टावेव भेदा इति अष्टमूर्तिरित्यनेन शब्देन ज्ञायते ।
जगन्नाथमतस्याधारः तयोर्द्वयोरपि भेदयोः कविप्रतिभा-निर्वर्तितत्वम् । किन्तु मम्मटाचार्यादीनां मतस्याधारः काव्यसारभूत-श्चमत्कारः । काव्यत्वस्य चमत्काराधीनत्वात् मम्मटाचार्यादीनां मतमेव साधु ।

**आधारग्रन्थः**

1. ध्वन्यालोकः
2. चन्द्रलोकः
3. रसगङ्गाधरः
4. काव्यप्रकाशः उद्योत टिका

[1] ध्व. लो.-२-२४
[2] तत्रैव वृत्तौ
[3] ध्व. लो. लो.द्वितीय उद्योत अर्थशक्त्युद्भव प्रकरणम् पृ. सं. २७५
[4] च. लो. -७/६, ७, ८.
[5] र.गं.गु. म.प्र. टीका पृ. सं. ११०
[6] का. प्र. उ. टीका अर्थशक्त्युद्भवध्वनिप्रकरणम् पृ. सं. १४०